शङ्खयुक्ता । यथा,—
"शङ्खिनी चापिनी बाणभुशुण्डीपरिघायुधा ।"
इति देवीमाहात्म्यम् ॥
उपदेवताविशेषः । शङ्खिनीवासशब्दार्थदर्शनात् ॥

शङ्खिनीफलः, पुं, ( शङ्खिन्याः फलमिव फलं यस्य ।) शिरीषवृक्षः । इति राजनिर्घण्टः ॥

शङ्खिनीवासः, पुं, ( शङ्खिन्या वास आश्रयस्थानम् ।) शाखोटवृक्षः । इति शब्दचन्द्रिका ॥

शङ्खी, [ न् ] पुं, (शङ्खोऽस्यास्तीति । शङ्ख + इनिः ।) विष्णुः । समुद्रः । इति मेदिनी ॥ शाङ्खिकः । शङ्खविशिष्टे, त्रि । इति शब्दरत्नावली ॥ (यथा, हरिवंशे भविष्यपर्व्वणि । ८ । १२ ।
"शङ्खिनं चक्रिणं विष्णुं खड्गिनं गदिनं
विभुम् ।"
शङ्खनिधिविशिष्टे च त्रि । यथा, मार्कण्डेये । ६८ । ४५ ।
"स्वपोषणपरः शङ्खी नरो भवति सर्व्वदा ।")

शच, इ ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् । ) ङ, शचते । इति दुर्गादासः ॥

शच, ङ वाचि । इति कविकल्पद्रुमः ॥ ( भ्वा०-आत्म०-सक०-सेट् । ) ङ, शचते । इति दुर्गादासः ॥

शचिः, स्त्री, ( शच वाचि + "सर्व्वधातुभ्य इन् ।" उणा० ४ । ११७ । इति इन् । ) इन्द्रपत्नी । इत्यमरटीकायां भरतः ॥

शची, स्त्री, ( शचि + कृदिकारादिति ङीष् । ) इन्द्रपत्नी । तत्पर्य्यायः । पुलोमजा २ इन्द्राणी ३ । इत्यमरः ॥ शचिः ४ सची ५ सचिः ६ । इति भरतः ॥ पूतक्रतायी ७ पौलोमी ८ । इति जटाधरः ॥ माहेन्द्री ९ जयवाहिनी १० ऐन्द्री ११ शतावरी १२ । इति शब्दरत्नावली ॥ ( यथा, रघुः । ३ । २३ ।
"उमावृषाङ्कौ शरजन्मना यथा
यथा जयन्तेन शचीपुरन्दरौ ।
तथा नृपः सा च सुतेन मागधी
ननन्दतुस्तत्सदृशेन तत्समौ ॥" )
शतमूली । स्त्रीकरणान्तरम् । तत्तु विङ्करणमिति केचित् ॥ इति मेदिनी ॥ ( कर्म्म । इति इति निघण्टुः ।२।१॥ यथा, ऋग्वेदे ।८।३२।१५।
"न किरस्य शचीनां नियन्ता सूनृतानाम् ॥"
प्रज्ञा । इति निघण्टुः । ३ । ९ ॥ वाक् । इति च निघण्टुः । १ । ११ ॥ )

शचीपतिः, पुं, (शच्याः पतिः ।) इन्द्रः । इत्यमरः ॥ ( यथा, मार्कण्डेये । १५ । ७० ।
"यदि जानासि धर्म्मं त्वं त्वं वा शक्र शचीपते ।
मम यावत् प्रमाणन्तु शुभं तद्वक्तुमर्हसः ॥"
कर्म्मपालके, त्रि । यथा ऋग्वेदे ।७।६७।५।
"शक्तं शचीपती शचीभिः ॥"
"हे शचीपती शचीति कर्म्मनाम कर्म्मणां पालकौ ।" इति तद्भाष्ये सायणः ॥ )

शट, सादे । शौर्य्ये । गतौ । रुजि । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-अक०-गतौ सक०-सेट् । ) सादोऽवसादः । शीर्णिर्भेदः । शटति लोकः अवसीदति । विशीर्णाति । गच्छति । रुजति वा इत्यर्थः । इति दुर्गादासः ॥

शट, क ङ श्लाघे । इति कविकल्पद्रुमः ॥ ( चुरा०-आत्म०-सक०-सेट् । ) क ङ, शाटयते । इति दुर्गादासः ॥

शटः, त्रि, अम्लः । शटधातोरच्प्रत्ययेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥

शटा, स्त्री, ( शट + अच् । टाप् । ) सटा । जटा । इत्यमरटीका ॥

शटिः, स्त्री, ( शट + इन् । ) शटी । इति शब्दरत्नावली ॥

शटी, स्त्री, ( शटि + वा ङीष् । ) स्वनामख्यातौषधिः । शून आदा इति भाषा । कचूर इति हिन्दी भाषा । तत्पर्य्यायः । गन्धमूली २ षड्ग्रन्थिका ३ कर्च्चूरः ४ पलाशः ५ । इत्यमरः ॥ सटी ६ षटी ७ गन्धशटी ८ कर्च्चुरः ९ कर्च्चूरः १० । इति भरतादयः ॥ सुगन्धा ११ सटिः १२ शटिः १३ गन्धमूला १४ गन्धोलिः १५ गन्धमूलकः १६ । इति शब्दरत्नावली ॥ गन्धसटा १७ वधूः १८ गन्धमूलम् १९ । इति जटाधरः ॥ जीमूतमूलम् २० कच्चोरम् २१ हिमजा २२ । इति रत्नमाला ॥ हैमी २३ षड्ग्रन्थिः २४ सुव्रता २५ गन्धाली २६ पलाशा २७ हिमा २८ । इति ग्रन्थान्तरम् ॥ षड्ग्रन्था २९ आमनिशा ३० सुगन्धमूला ३१ गन्धाली ३२ शटीका ३३ पलाशिका ३४ सुभद्रा ३५ लघी ३६ दूर्व्वा ३७ गन्धा ३८ पृथुपलाशिका ३९ सौम्या ४० हिमोद्भवा ४१ गन्धवधूः ४२ । अस्या गुणाः । तिक्तत्वम् । अम्बरत्वम् । लघुत्वम् । उष्णत्वम् । रुचिकारित्वम् । ज्वरकफास्रकण्ठगदोषरक्तामयध्वंसकारित्वम् । हृद्यत्वञ्च । इति राजनिर्घण्टः ॥ अपि च । अथ गन्धपलाशी सुगन्धद्रव्यं काश्मीरे प्रसिद्धम् ।
"शटी पलाशी षड्ग्रन्था सुव्रता गन्ध-
मूलिका ।
गन्धारिका गन्धवधूर्वधूः पृथुपलाशिका ॥
भवेद्गन्धपलाशी तु कषाया ग्राहिणी लघुः ।
तिक्ता तीक्ष्णा च कटुकानुष्णास्यमलनाशिनी ।
शोथकासव्रणश्वासशूलाध्मानग्रहापहा ॥"
इति भावप्रकाशः ॥

शड्डकं, क्ली, घृतजलमिश्रितशालिचूर्णम् । मयदार शाटा इति भाषा । यथा,
"शालिचूर्णं घृतं तोयं मिश्रितं शड्डकं वदेत् ॥"
इति भावप्रकाशः ॥

शठ, वधक्लेशकैतवे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् । ) क्लेशो दुःखानुभवः । कैतवं मिथ्यावचनम् । शठति खलः साधुं वञ्चयतीत्यर्थः । इति दुर्गादासः ॥

शठ, क आलस्ये । गत्यसंस्कृतसंस्कृते । इति कविकल्पद्रुमः ॥ ( चुरा०-पर०-अक०-सेट् । ) क, शाठयति दृढः क्रियासु मन्दः स्यादित्यर्थः । इति दुर्गादासः ॥

शठ, क ङ श्लाघे । इति कविकल्पद्रुमः ॥ ( चुरा०-आत्म०-अक०-सेट् । ) क ङ, शाठयते । इति दुर्गादासः ॥

शठ, त् क दुर्व्वाचि । इति कविकल्पद्रुमः ॥ ( अदन्तचुरा०-पर०-सक०-सेट् । ) शठयति नीचः कुत्सितं वदतीत्यर्थः । रमानाथस्तु सम्यग्भाषणे इति मत्वा शठयति सम्यग्वदतीत्यर्थं इत्याह । सम्यग्भाषणे इति जौमराः । समग्भावे इत्येके । इति दुर्गादासः ॥

शठं, क्ली, ( शठ + अच् । ) तगरम् । कुङ्कुमम् । लोहम् । इति राजनिर्घण्टः ॥

शठः, पुं, मध्यस्थपुरुषः । धूर्त्तः । ( यथा, मनुः । ४ । ३० ।
"पाषण्डिनो विकर्म्मस्थान् वैडालव्रतिकान्
शठान् ।
हैतुकान् वकवृत्तींश्च वाङ्मात्रेणापि नार्च्चयेत् ॥")
धुस्तूरः । इति मेदिनी ॥ शठस्य लक्षणम् । यथा,—
"प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम् ।
व्यक्तापराधचेष्टश्च शठोऽयं कथितो बुधैः ॥"
इति विष्णुपुराणे । ३।१८।२१ । श्लोकटीका ॥
चतुर्व्विधपत्यन्तर्गतपतिविशेषः । तस्य लक्षणम् । कामिनीविषयकपटपटुः । यथा,—
"मौली दाम विधाय भालफलके यालिख्य
पत्रावलीं
केयूरं भुजयोर्निधाय कुचयोर्व्विन्यस्य मुक्ता-
स्रजम् ।
बिम्बास्यं वसुपार्श्वयन् मृगदृशः काञ्चीनिवेश-
च्छला-
न्नीवीग्रन्थिमपाकरोति मृदुना हस्तेन वाम-
भ्रुवः ॥"
इति रसमञ्जरी ॥
(वृष्णिवंशीयविशेषः । यथा, हरिवंशे । भविष्यपर्व्वणि । २ । ३ ।
"बलभद्रं शिनेः पुत्रं हार्द्दिक्यं शठसारणौ ॥")

शठता, स्त्री, ( शठ + तल् । ) शठस्य भावः । तत्पर्य्यायः । माया २ शाठ्यम् ३ कुसृतिः ४ निकृतिः ५ । इति हेमचन्द्रः ॥ अन्यच्च ।
"अस्त्रियां कपटो व्याज उपधिर्दम्भ एव च ।
कूटं कल्कं छलं छद्म मिषकैरवकैतवम् ॥
अथ शाठ्यञ्च शठता कुसृतिर्निकृतिश्च या ।
हिंसापाये चतुष्कं स्यात् शाठ्यपर्य्याय ईरितः ॥
पूर्व्वः कपटपर्य्यायः मते वञ्चनमात्रके ।
उभयोरेकपर्य्याय इति केचित् प्रचक्षते ॥"
इति शब्दरत्नावली ॥

शठाम्बा, स्त्री, अम्बष्ठा । इति राजनिर्घण्टः ॥

शड, इ ङ संघरुजोः । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) तालव्यादिः । इ,